**শ্রী রমেশস্তুতিঃ (শ্রী ৱাদিরাজযতি ৱিরচিত)**

প্রাতঃ স্মরামি ৱরকুংডল-শোভিগংডং
শীতাংশু-মংডল-মুখং সিতৱারিজাক্ষম্ ।
আতাম্র-কম্র-মুদিতাধর-বিংব-জৃংভি
ধ্যাতৃ-প্রহর্ষ-কর-হাসরাসং রমেশম্ ॥ ১ ॥
প্রাতর্ভজামি শুভ-কৌস্তুভ-কংবুকংঠং
স্ফীতাত্ম-ৱক্ষসি ৱিরাজিত-ভূরিহারম্ ।
ভীত-স্বভক্ত-ভয-ভংজন-পাণিপদ্মং
শাতোদরার্পিত-জগদ্-ভরমব্জনাভম্ ॥ ২ ॥
প্রাতর্নমামি শুভ-কিংকিণি-মেখলাংগং
পীতাংবরং করি-করোরু-মুদারজানুম্ ।
ধ্যাতাংঘ্রি-যুগ্ম-রুচিরং জিত-কংজজাত-
ৱাতাদি-দেৱ-ৱর-মৌলি-মণিং মুকুংদম্ ॥ ৩ ॥
ৱাদিরাজ-যতি-প্রোক্তং শ্লোক-ত্রযমিদং শুভম্ ।
প্রাতঃকালে পঠন্ মর্ত্যঃ সর্ৱপাপৈঃ প্রমুচ্যতে ॥ ৪ ॥
॥ ইতি শ্রীৱাদিরাজযতিকৃতা রমেশস্তুতিঃ ॥